योगवासिष्ठः/प्रकरणम् ६ (निर्वाणप्रकरणस्य उत्तरार्धम्)/सर्गः ११७

अज्ञातलेखकः

सहचरा ऊचुः ।

पश्याद्रिसानाविव बिम्बितं स्वं पुरःसरो मारपुरःसरो यः ।

कह्लारपद्मोत्पलजालनाल-ललद्विचित्रारवपक्षिवीतम् ।। १

विकासितोद्दण्डसहस्रपत्र-कोशस्थलस्थोद्धुरराजहंसम् ।

पीठद्विरेफद्विजलोकजुष्टं भुवीव गेहं कमलासनस्य ।। २

आकीर्णसीकरकरालदिगन्तराले फुल्लोत्पलाब्जपटलोदररेणुगौरम् ।

आमोदमत्तमधुपद्विजगीतिगीतं यातं वितानकमिवाम्बरगं वहन्तम् ।। ३

क्वचित्तरत्तारतरङ्गभङ्गं क्वचिद्विषद्धूरिविराविभृङ्गम् ।

क्वचिद्गभीरामलवारिसुप्तं क्वचित्सरोजोज्ज्वलपुष्पगुप्तम् ।। ४

कणाणुमुक्ताजलतापटालं तीरेषु सिंहे सुलतासुटालम् ।

तरङ्गनिर्धूतशिलोग्रकच्छं महीतलाकाशमनन्तकच्छम् ।। ५

तडित्प्रकाशोदरमस्यमेघ-नुन्नालजातोत्थरजःप्रभाभिः ।

पृषद्धरध्वान्तमयैकदेशं संध्याम्बराभोगमिवाप्रकाशम् ।। ६

वातावकीर्णशरदम्बुदखण्डखण्डं व्योमेव केवलसमीरणमावृताङ्गम् ।

हसैर्लसद्बिसलताकवलालसांसैः कालेन संचयकृतैरिव चन्द्रबिम्बैः ।। ७

आमोदमन्दमकरन्दकरालवात-व्याधूतपङ्कपुटपाटनपाटवेन ।

उद्यन्महापटपटा वयतीव लेखा क्षुभ्यत्खगाश्रितलतोज्झितपुष्पवर्षम् ।। ८

वेल्लन्महाकमलपल्लवतालवृन्त-संवीजितं वलितचामरचारुफेनम् ।

राजायमानमलिकोकिलगीतगीतं सहृत्तपङ्कजलताललिताङ्गनौघम् ।। ९

भृङ्गाग्रभाजनमनोहरहारिगीतं राजीवरेणुरणकीर्णपिशङ्गतोयम् ।

डिण्डीरपिण्डपरिपाण्डुरपुण्डरीक-खण्डोपमण्डिततटोपवनावतंसम् ।। १०

विविक्तहृदयाम्भोजं हृदयाह्लादनं परम् ।

रसवत्स्वादु भातीदं सरः सत्संगमोपमम् ।। ११

बिम्बितेन मरुव्योम्ना भातीदं सौम्य निर्मलम् ।

शास्त्रार्थपरिणामेन महतामिव मानसम् ।। १२

किंचिल्लक्ष्यमपश्यामं पृषत्परुषमारुतम् ।

हिमाभ्रमिव भातीदं सरः सरससारसम् ।। १३

यथेदं ब्रह्मणो दृश्यमविकारादि नेतरत् ।

यथाम्भसि तरङ्गादि राजन्पृथगिव स्थितम् ।। १४

आत्मनैवोह्यमानानां चक्रावर्तविधायिनाम् ।

जडाशयानां विषमा हा कल्लोलपरम्परा ।। १३

कूपवापीसरोब्धीनां दृश्यते यादृगन्तरम् ।

नारीपुरुषतोयानां विज्ञेयं तादृगन्तरम् ।। १६

जन्तोरिवास्य मनसो जलजातिबन्ध-

जीर्णस्य जर्जरदशालहरीभ्रमेण ।

आवर्तवृत्तिवलितान्यतिसंततानि

को नाम संकलयितुं कमलानि शक्तः ।। १७

चित्रं विजृम्भितमहो जडसंगमस्य

पद्मोपि यन्निजगुणानगुणानिवैषः ।

अन्तः प्रगोपयति कण्ठतले निवेश्य

सर्वस्य दर्शयति दुर्भगकण्टकौघम् ।। १८

सच्छिद्रैरदृढैः सूक्ष्मैर्गोपितैर्जाड्यसंयुतैः ।

अनल्पैरपि निःसारैः पद्मस्येव गुणैरलम् ।। १९

महतां कुलपद्मानां गुणसौन्दर्यशालिनाम् ।

प्रभावं नास्ति संख्यातुं वासुकेरपि शक्तता ।। २०

हरिवक्षोगता लक्ष्मीरपि शोभार्थमेव यत् ।

बिभर्ति कमलं हस्ते कान्याशंसाधिका भवेत् ।। २१

सितासिताभ्यां रूपाभ्यां कमलोत्पलखण्डयोः ।

वैसादृश्यं भवेत्किंतु समा जडजडैतयोः ।। २२

साम्यं न फुल्लविपिनेन सरःसु याति

व्योम्ना न तारकयुतेन न चेन्दुवृन्दैः ।

नृत्यद्वधूविहसिताननशोभयैति

फुल्लस्य पङ्कजवनस्य नवोदिता श्रीः ।। २३

येषां पुष्पलतास्वादैरनन्यमनसां गतम् ।

भृङ्गाणामायुरायामि त एव सुभगोत्तमाः ।। २४

चूतचारुचमत्कारं चञ्चरीकाश्चरन्ति ये ।

त एव सचमत्कारा इतरे जातिपूरणम् ।। २५

मत्ता मधुमदामोदैः पुष्करेषु रणन्ति ये ।

तुष्टानामितरस्वादैर्भ्रमराणां हसन्ति ते ।। २६

येनोषितं विरुतमुल्लसितं प्रसुप्तं

पद्मोदरेषु शशिकोटरकोमलेषु ।

भृङ्गः स एष शिशिरे विरसेषु भावं

कष्टं करिष्यति कथं तरुपुष्पकेषु ।। २७

अफुल्लमल्लिकोद्दाममुकुलोपरि षट्पदः ।

दृश्यते कालरुद्रेण शूले प्रोत इवान्धकः ।। २८

आस्वादयन्विविधपुष्पमधूनि भृङ्ग

नित्यं भ्रमन्सकलशैललतागृहेषु ।

नाद्यापि तुष्यसि किमङ्ग दुराशयोऽसि

मन्ये न सारमुपगच्छसि वा वनेभ्यः।। २९

कमलकुलकवलकोविद गच्छ सरो मधुप मा रूढम् ।

बदरदरीषु विदीर्णं देहं कुरु कण्टकक्रकचैः ।। ३०

अतसीकुसुमे कुवलय-दलवलये विकसिते च तापिच्छे ।

परभागमेहि मधुना तासु विसदृशीव पण्डितः पुरुषः ।। ३१

पश्यैषा नाभिनलिनीकेसरैः पालिता श्रिया ।

हंसमालामलावल्ली सामगायनकूजिता ।। ३२

दोलाकमलनीडस्थां दृष्ट्वा खे प्रतिबिम्बिताम् ।

हंसो हंसीमनुसरन्मण्डले नेह चेतति ।। ३३

मा भूत्कस्यचिदेवैषा राजन्व्यसनिता भृशम् ।

पश्यैतां बिम्बितां हंसो हंसीमनुसरन्मृतः ।। ३४

हेलया राजहंसेन यत्कृतं कलकूजितम् ।

न तद्वर्षशतेनापि जानात्याशिक्षितुं बकः ।। ३५

समानेष्वाकराकारजातिचेष्टाशनादिषु ।

हंसस्य राजहंसस्य दूरमत्यन्तमन्तरम् ।। ३६

शुक्लपक्षस्थितो व्योम्नि कुमुदाकरभासकः ।

आह्लादयति चेतांसि हंसश्चन्द्र इवोत्थितः ।। ३७

उन्नालनलिनीनालकदलीस्तम्भसंकुले ।

वने विहरतां लक्ष्मीं हंसानामेति कः खगः ।। ३८

तरङ्गवलया लोलसीकरोत्करहारिणी ।

कुमुदोत्पलकह्लारपुष्पसंभारसुन्दरी ।। ३९

भृङ्गलोलालकलता रणत्सारसनूपुरा ।

वर्तुलावर्तनाभीका चलद्वीचिविलोचना ।। ४०

प्रतीक्षमाणा दयितं रसपूरकरं धरम् ।

नारीव सरसी चारुहंसकाभ्यां विराजते ।। ४१

हे हंस मद्गुबककाकशरारुसारे

मा त्वं सरस्यविरतं कुरु वासमेकः ।

आपद्यपीह समशीलवयोवचोभिः

श्रेयःफला भवति संगतिरात्मवर्गैः ।। ४२

पादाक्रान्तमहेभमस्तकतटः पद्माकरैकालयः

कह्लारोत्पलकुन्दचम्पकलतासंभोगसौभाग्यवान् ।

भृङ्गोऽप्येष विधेर्वशेन शिशिरे लोष्टं तृणं स्वादयन्

शीते शुष्कबकत्यहो नु विपदा दैन्ये मनो दीयते ।।४३

पुत्रस्येह दलोदरे द्युति तरत्तारं चिरं संस्मृतं

हंसस्यांसविनुन्ननालगहने संचारिणा भो मया ।

शुक्लासारमिवाब्जिनी विकिरति स्वं वारिबिन्दूत्करं

मध्याह्ने शिशिरं विकासि सहसा मूर्ध्नि स्फुटं दृश्यताम् ।। ४४

व्योम्नीन्दोरिवसौम्यवारिणिचिरं निःशब्दकं सर्पतो

हंसस्यांसहताब्जनालवलनानिष्कम्पटङ्कक्षतैः ।

गङ्गावारिवदत्र पुष्करपुटाद्ब्राह्मादिवास्योपरि

भ्रष्टा ये जलबिन्दवो जलचरा हृष्टाः पिबन्त्याशु तान्

इत्यार्षे श्रीवासिष्ठमहारामा० वा० दे० मो० नि० उ० अविद्यो० विप० पद्मभ्रमरहंसवर्णनं नाम सप्तदशाधिकशततमः सर्गः ।। ११ ७।।